# कार्तज्ञ्यभावः

तत्रभवतो परममङ्गलमयस्य परात्पराखिलेश्वरस्य अकारणकरुणा–वरुणालयस्य भक्तवाञ्छाकल्पतरोः भगवतः श्रीबाँकेविहारिणः कृपावलम्बनं विना न कोऽपि सफलतामाप्नोति । अतो मदीयास्य शोधकार्यस्येदानीं सम्पूर्तिमेति भगवतो लीलापुरुषोत्तमस्य कृपयेति सदा भक्तकल्याणाय तत्परं श्रीबाँकेविहारिणं प्रणौमि ।

शुद्धसत्त्वसमायुक्तः योगयुक्तश्च सर्वधीः ॥
ज्ञानदः मन्त्रदः साक्षात्श्रीराजवंशी मम गुरुः ॥

श्रीराजवंशीद्विवेदीति भगवद्रूपधारकम् ।
प्रणमामि मुहुर्नित्यं तारकं तम हारकम् ॥

प्रथमे हि अनन्तश्रीविभूषितानां साक्षाद्भगवत्स्वरूपाणां ऋषिकल्पविद्वच्चक्रचूणामणीनां विविधविद्याविशारदानां गोब्राह्मणभक्तानां परमोदारस्वभावानां विदितसकलशास्त्राणां विश्रुतयशसां व्याकरणशास्त्राम्बुधिपारदृश्वानां परमादरणीयानां गोलोकनिवासिनां पूज्यश्रीराजवंशीद्विवेदिगुरुवर्याणां पादपद्मेषु सश्रद्धं सादरं साष्टाङ्गं प्रणमाञ्जलिमर्पयामि ।

अध्यापयन्तं सयाजीनगर्यां धेनुं सदा सेवमानं गुरुं वै ।
प्रसन्नचित्तेन मुदा पाठयन्तं नमामि प्रणौमि गुरून् रामपालान् ॥

स्वनामधन्यानां प्रथितयशसां विविधविद्याविशारदानां व्याकरणसाहित्यवेदवेदाङ्गादिमर्मज्ञानां पारम्परिकसंस्कृताध्ययनविभागस्य विभागाध्यक्षमहोदयानां श्रद्धेयगुरुचरणानां 'डॉ.रामपालशुक्लगुरुवर्याणां' चरणकमलयोः स्वकीयां प्रणतिं सादरं समर्पयामि । येषां

समयसारितासूचकात्पूर्वकात् योग्यनिर्देशनात् शोधप्रबन्धकार्यमिदं सोत्साहं सानन्दं सुसम्पन्नं जातम् । अतः तेषां विद्वत्कुलसम्भवानां चरणारविन्दयोः पुनः पुनः कार्तज्ञ्यं विनिवेदयामि । तथा मयि सदैव वात्सल्यभावप्रदातृभ्यः गुरुमातृभ्यः "श्रीमती शीला शुक्ला" इत्याख्याभ्यः चरणारविन्दयोः महत्या श्रद्धया प्रणमाञ्जलिं प्रणयन् कार्तज्ञ्यं संस्मरामि ।

प्रदत्तसंस्कृताध्ययनावसरेभ्यः गोलोकवासिभ्यः मदीय बाल्यकालादेवपथप्रदर्शकेभ्यः परमपूजनीयेभ्यः पितृव्यचरणेभ्यः पं.श्रीगयाप्रसादमिश्र' इत्याख्येभ्यः यतो हि एषाम् ऋणान्मुक्तः कथमपि न भविष्यामि तेभ्यश्च हृदयेन पादपाद्मेषु प्रणमाञ्जलिमर्पयामि ।

मातृदेवो भव पितृदेवो भव आचार्यदेवो भव इति श्रुतेरनुशासनं स्मारं स्मारं सदैव भगवद्भक्तिनिततामन्वर्थनाम्नी 'श्रीमती लीलावतीमिश्रा' इत्याख्यां धारयन्तीं स्वमातरं सादरं प्रणमामि । तथैव श्रीसीतारामोपासकानां पितृचरणानां ममादर्शरूपाणां 'श्रीअयोध्याप्रसादमिश्र' इत्याख्यानां चरणकमलयोः भूरि भूरि प्रणमामि । अनयोः कृपाशीषं विना शोधकार्यं न सम्भवितुमर्हति । पुनः मातृपितृचरणारविन्देभ्यः भूयो भूयो प्रणमामि ।

ततश्च परमवैयाकरणानां प्रख्यातयशसां अष्टादशपुराणप्रवक्तृणां भागवतमर्मज्ञानां पूज्यगुरुचरणानां 'आचार्यव्रजपालशुक्लमहोदयानां चरणकमलयोः प्रणामम् अर्पयामि कृतज्ञतां च ज्ञापयामि ।

सरस्वतीसमुपासकानां सरलस्वभावानां छात्रप्रियाणां महाकवीनां विश्रुतयशसां न्यायादिशास्त्रकलाविचक्षणां प्रो. रवीन्द्रकुमारपण्डामहाभागानां चरणकमलयोः प्रणमाञ्जलिं समर्पयामि ।

अनुसन्धानकार्यमिदं सम्पादयितुं विशेषतः सकलसौलभ्यप्रदातॄणां सदैव अनुसन्धानकार्यकर्तुं प्रेरिकानां प्राच्यविद्यामन्दिरस्य नियामिकानां डॉ. श्वेता प्रजापतिमहोदयानां तासां सहयोगं विना कार्यमिदं नैव पूर्णं भवितुं शक्यते, अतः तासां हार्दं कृतज्ञतां संस्मरामि । अनुसन्धानकर्मण्यस्मिन् सदैव ममोत्साहं प्रेरणाञ्च दत्तवन्तः । सरलस्वभावानां स्वविषयविशेषज्ञानां डॉ. जयन्त उमरेठियामहाभागानां नितरां हृदा कृतज्ञतां धन्यवादं च विनिवेदयामि । तथा च अनुसन्धानकार्येऽस्मिन् सदा प्रोत्साहं प्रेरणां च प्रदत्तवन्तौ डॉ. शर्मिला बागची डॉ. विपुलपटेल– अनयोरपि पुनः पुनः कार्तज्ञ्यं व्याहरामि । तथा मम सम्भूयकारिणां श्री मनोजः उपाध्यायः, श्रीहर्षलभट्टः, श्री डी. एल. काशीकरमहोदयानां श्रीमती अमीभट्ट– श्रीमती सास्वती सेन– श्रीमती नीना भट्ट– श्रीमती नेहा सहस्त्रभोजनी– डॉ. अञ्जना तिवारी, चिरागी शाह– इत्येषां सर्वेषां भूयो भूयः कार्तज्ञ्यं संस्मरामि ।

अनुसन्धानकर्मणि सदा प्रेरकाभ्यां वात्सल्यदत्तवद्भ्यां मम ज्येष्ठभ्रातृभ्यां श्रीशिवकुमार–श्रीरामगोपालमिश्राभ्यां कृतज्ञतामर्पयन् अनयोः चरणकमलेषु प्रणमाञ्जलिमर्पयामि । तथा मम शोधकार्येऽअतीव सहयोगं प्रदत्तवते मम भ्रात्रीयाय अजयमिश्राय मम स्नेहं वितरामि ।

मम शोधकार्ये सदैव मनोवाग्योगैः सहाय्यं विदधन्तीं सकलसौलभ्यप्रदात्रीं मदीयार्धाङ्गिनी, ममैतद् सौभाग्यं देवगुरुपूर्वजप्रसादात् मम जीवने कञ्चनाख्या बुद्धिमती पत्नी समागता, मम जीवने समागच्छतां काठिन्यानां निवारणं कुर्वन्ती कार्येऽपि सहयोगमपि कृतवती "श्रीमती राधिका मिश्रा" इत्याख्यावती अस्मिन् प्रसङ्गे भृशं संस्मरामि । तथा च

बालसुलभचपलस्वभावप्रकटनाभिः मनोह्लादकारयित्री मम दुहिता ‘‘वेदिका मिश्रा’’ इति नामधेयवती स्वात्मजां सदैव प्रेम्णा स्मरामि ।

डॉ.रामपालशुक्लफाउण्डेशन– इत्याख्याः संस्थायाः विशेषरूपेण धन्यवादं ज्ञापयामि यन्मम पीएच.डी.शुल्कं आदावन्तं प्रदत्तमिति । अस्याः संस्थायाः मुहुर्मुहुः कार्तज्ञ्यं ज्ञापयामि ।

परं सुहृदाः यैर्भूयो भूयः शोधार्थे सहाय्यं कृतं ते– श्री सुरेन्द्रशास्त्री (आगरा), डॉ. मेदनीप्रसाददाहालः, श्री इन्द्रपालशुक्लः, श्री हेमाङ्गजोषी, मम भगिनी रागिनी जोषी, श्री शिवमशुक्लः इत्यादयो भृशं धन्यावादाः अर्पयन्ते ।

एवञ्चास्मिन् शोधकार्ये प्रत्यक्षाप्रत्यक्षरूपेण येषां सहयोगः सम्प्राप्तः अथ च मे कोऽपि शुभचिन्तकाः तेभ्यः सर्वेभ्यः प्रणतिपुरस्सरमाभारं प्रकटये । अन्ततः प्राच्यविद्यामन्दिररस्य तथा तस्य पुस्तकालयस्य एवं महाराजासयाजीरावविश्वविद्यालयस्य कार्तज्ञ्यं प्रकटयाम्यऽहम् ।

आषाढे हि शुक्लपक्षे अष्टम्यां भौमवासरे ।
ऋतून्सप्तर्षिनभे पक्ष – संवत्सरे तथा ॥
रामपालगुरून्नत्वा प्रणम्य शारदां मुदा ।
स्वीकृत्य भागवतं काव्यं तत्त्वं विमर्शात्मकं ।
लिख्यते ज्ञानवृध्यर्थं विद्यावारिधिप्राप्तये ॥

------------------